OU POPUI G

hly educ

1. Vikas ABC Bo
(In Multicolo
(1) ABC
(2) AB
(3) AB
(4) My
(5) Vik
(6) AB

2. Vikas G
Bo

3

2

ஸ்நான ஸங்கல்ப

OUR MOST POPULAR PUBLICATIONS

Series of highly educative books in multicolour
(For K. G. and Standards I to VII)

1. **Vikas ABC Books :**
   (In Multicolour)
   (1) ABC in Pictures
   (2) ABC for Beginners
   (3) ABC for Juniors
   (4) My ABC
   (5) Vikas Alphabet (Learning & Writing)
   (6) ABC Practice Workbook

2. **Vikas Gulmohar K. G. Syllabus**
   Books 1 & 2 for Jr. & Sr. K. G.

3. **English Primers**
   (1) Vikas Primers 1 & 2 for Jr. & Sr. K. G.
   (2) Bal Anand Primers
   1-2 for Jr.-Sr. K. G.

4. **Vikas English Readers**
   Books 1 to 5 for Standards I to V

5. **Progressive General English Course**
   (1) Introductory I & II for K. G.
   (2) Books 1 to 7 for Standards I to VII

13. **Bal Anand-Once Upon a Time.....**
    (History-cum-Story books)
    Books 1 & 2 for Standards I & II

14. **Bal Anand Geography**
    Books 1 & 2 for Standards I & II

15. **Progressive General Knowledge**
    Books 1 & 2

16. **Progressive Mathematics**
    (1) Vikas Table Book
    (2) Infant Number Book (WB) 1-20
    (3) Vikas Numbers (Workbook) 1-50
    (4) Vikas Numbers (Workbook) 1-100
    (5) Counting Made Easy (1-10)
    (6) My 1st Book of Numbers (1-20)
    (7) My 2nd Book of Numbers (1-100)
    (8) **Progressive Mathematics**
    (An Integrated Course)
    Books 1 to 5 for Standards I to V

17. **Bal Anand Paper Patterns**
    (Cutting and

VIKAS PROGRESS

DRAWING

FOR K. G. (INTRODUCTORY



॥ सूक्तानि ॥

पुरुषसूक्तम्, विष्णुसूक्तम्, श्रीसूक्तम्, भूसूक्तम्,

नीळासूक्तम्, दुर्गासूक्तम्, मेधासूक्तम्,

शान्तिपञ्चकम्, च सस्वरम् ।

SŪKTHĀS

(WITH SWARA)

Sri Vani Vilas Press, Srirangam.

1990 [Price Rs. 3-50]

ॐ

॥ पुरुषसूक्तम् ॥

प्रथमोऽनुवाकः ॥

स॒हस्र॑शीर्षा॒ पुरु॑षः । स॒ह॒स्रा॒क्षः स॒हस्र॑-
पात् । स भूमिं॑ वि॒श्वतो॑ वृ॒त्वा । अत्य॑तिष्ठ-
द्दशाङ्गु॑लम् । पुरु॑ष ए॒वेदꣳसर्वम्॑ । यद्भू॒तं
यच्च॒ भव्य॑म् । उ॒ताम॑ृत॒त्वस्येशा॑नः । यदन्ने॑-
नाति॒रोह॑ति । ए॒तावा॑नस्य महि॒मा । अतो॒
ज्याया॑ꣳश्च॒ पूरु॑षः पादो॑ऽस्य॒ विश्वा॑ भू॒तानि॑ ।
त्रि॒पाद॑स्या॒मृतं॑ दि॒वि । त्रि॒पादू॒र्ध्व उदै॑त्पुरु॑षः ।
पादो॑ऽस्ये॒हाऽऽभ॑वा॒त्पुन॑ः । ततो॒ विष्व॒ङ्व्य॑-

இப்புஸ்தகத்தில் '–' என்ற குறி அனுதாத்தஸ்வரத்தையும் '|' என்பது ஸ்வரிதத்தையும் '∪' என்பது தீர்க்கஸ்வரிதத்தையும் குறிக்கும்.

क्रामत् । साशनानशने अभि । तस्माद्विराड-
जायत । विराजो अधि पूरुषः । स जातो
अत्यरिच्यत । पश्चाद्भूमिमथो पुरः । यत्पुरुषेण
हविषा । देवा यज्ञमतन्वत । वसन्तो अस्या-
सीदाज्यम् । ग्रीष्म इध्मश्शरद्धविः । सप्तास्या-
सन्परिधयः । त्रिः सप्त समिधः कृताः । देवा
यद्यज्ञं तन्वानाः । अबध्नन्पुरुषं पशुम् । तं
यज्ञं बर्हिषि प्रौक्षन् । पुरुषं जातमग्रतः । तेन
देवा अयजन्त । साध्या ऋषयश्च ये । तस्मा-
द्यज्ञात्सर्वहुतः । संभृतं पृषदाज्यम् । पशूं-
स्ताश्चक्रे वायव्यान् । आरण्यान्ग्राम्याश्च ये ।
तस्माद्यज्ञात्सर्वहुतः । ऋचः सामानि जज्ञिरे ।
छन्दांसि जज्ञिरे तस्मात् । यजुस्तस्मा-
दजायत । तस्मादश्वा अजायन्त । ये के
चोभयादतः । गावो ह जज्ञिरे तस्मात् ।

तस्मॉज्जाता अजावयः । यत्पुरुषं व्यदधुः ।
कतिधा व्यकल्पयन् । मुखं किमस्य कौ बाहू ।
कावूरू पादावुच्येते । ब्राह्मणोऽस्य मुखमासीत् ।
बाहू राजन्यः कृतः । ऊरू तदस्य यद्वैश्यः ।
पद्भ्या २ शूद्रो अजायत । चन्द्रमा मनसो
जातः । चक्षोः सूर्यो अजायत । मुखा-
दिन्द्रश्चाग्निश्च । प्राणाद्वायुरजायत । नाभ्या
आसीदन्तरिक्षम् । शीर्ष्णो द्यौः समवर्तत ।
पद्भ्यां भूमिर्दिशः श्रोत्रात् । तथा लोका२ अकल्प-
यन् । वेदाहमेतं पुरुषं महान्तम् । आदित्यवर्णं
तमसस्तु पारे । सर्वाणि रूपाणि विचित्य धीरः ।
नामानि कृत्वाऽभिवदन् यदास्ते । धाता पुर-
स्ताद्यमुदाजहार । शक्रःप्रविद्वान्प्रदिशश्चतस्रः ।
तमेवं विद्वानमृत इह भवति । नान्यः पन्था
अयनाय विद्यते । यज्ञेन यज्ञमयजन्त देवाः ।

तानि धर्माणि प्रथमान्यासन् । ते ह नाकं महिमानः सचन्ते । यत्र पूर्वे साध्याः सन्ति देवाः ॥ १ ॥

द्वितीयोऽनुवाकः ॥

अद्भ्यः संभूतः पृथिव्यै रसाच्च । विश्वकर्मणः समवर्त्तताधि । तस्य त्वष्टा विदधद्रूपमेति । तत्पुरुषस्य विश्वमाजानमग्रे । वेदाहमेतं पुरुषं महान्तम् । आदित्यवर्णं तमसः परस्तात् । तमेव विद्वानमृत इह भवति नान्यः पन्था विद्यतेऽयनाय । प्रजापतिश्चरति गर्भे अन्तः । अजायमानो बहुधा विजायते ॥

तस्य धीराः परिजानन्ति योनिम् । मरीचीनां पदमिच्छन्ति वेधसः । यो देवेभ्य

आतपति । यो देवानाँ पुरोहितः । पूर्वो यो देवेभ्यो जातः । नमो रुचाय ब्राह्मये । रुचं ब्राह्मं जनयन्तः । देवा अग्रे तदब्रुवन् । यस्त्वैवं ब्राह्मणो विद्यात् । तस्य देवा असन् वशे । ह्रीश्च ते लक्ष्मीश्च पत्न्यौ । अहोरात्रे पार्श्वे । नक्षत्राणि रूपम् । अश्विनौ व्यात्तम् । इष्टं मनिषाण । अमुं मनिषाण । सर्वं मनिषाण ॥ २ ॥

सहस्रशीर्षं देवं विश्वाक्षं विश्वशंभुवम् । विश्वं नारायणं देवमक्षरं परमं पदम् । विश्वतः परमान्नित्यं विश्वं नारायणꣳ हरिम् । विश्वमेवेदं पुरुषस्तद्विश्वमुपजीवति । पतिं विश्वस्यात्मेश्वरꣳ शाश्वतꣳ शिवमच्युतम् । नारायणं महाज्ञेयं विश्वात्मानं परायणम् । नारायण-

परो ज्योतिरात्मा नारायणः परः । नारायणपरं ब्रह्म तत्त्वं नारायणः परः । नारायणपरो ध्याता ध्यानं नारायणः परः । यच्च किञ्चिज्जगत्सर्वं दृश्यते श्रूयतेऽपि वा । अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः । अनन्तमव्ययं कविं समुद्रेऽन्तं विश्वशंभुवम् । पद्मकोशप्रतीकाशं हृदयं चाप्यधोमुखम् । अधो निष्ट्या वितस्त्यान्ते नाभ्यामुपरि तिष्ठति । ज्वालमालाकुलं भाती विश्वस्यायतनं महत् । सन्तत शिलाभिस्तु लम्बत्याकोशसन्निभम् । तस्यान्ते सुषिरं सूक्ष्मं तस्मिन्त्सर्वं प्रतिष्ठितम् । तस्य मध्ये महानग्निर्विश्वार्चिर्विश्वतोमुखः । सोऽग्रभुग्विभजन्तिष्ठन्नाहारमजरः कविः । तिर्यगूर्ध्वमधश्शायी रश्मयस्तस्य सन्तता । सन्ता-

पर्यति स्वं देहमापादतलमस्तगः । तस्य मध्ये वह्निशिखा अणीयोर्ध्वा व्यवस्थितः । नीलतोयदमध्यस्थाद्विद्युल्लेखेव भास्वरा । नीवारशूकवत्तन्वी पीता भास्वत्यणूपमा । तस्याः शिखाया मध्ये परमात्मा व्यवस्थितः । स ब्रह्म स शिवः स हरिः सेन्द्रः सोऽक्षरः परमः स्वराट् ॥

ऋतं सत्यं परं ब्रह्म पुरुषं कृष्णपिङ्गलम् । ऊर्ध्वरेतं विरूपाक्षं विश्वरूपाय वै नमो नमः ॥

नारायणाय विद्महे वासुदेवाय धीमहि । तन्नो विष्णुः प्रचोदयात् ।

य

विष्णोर्नुकं वीर्याणि प्रवोचं यः पार्थिवानि विममे रजाꣳसि यो अस्कभायदुत्तरꣳसधस्थं विचक्रमाणस्त्रेधोरुगायो विष्णो रराटमसि विष्णोः पृष्ठमसि विष्णोःश्नप्त्रेस्थो विष्णोस्स्यूरसि विष्णोर्ध्रुवमसि वैष्णवमसि विष्णवे त्वा ॥

॥ ओं शान्तिः शान्तिः शान्तिः ॥

॥ विष्णुसूक्तम् ॥

विष्णोर्नुकं वीर्याणि प्रवोचं यः पार्थिवानि विममे रजांसि यो अस्कभायदुत्तरꣳसधस्थं विचक्रमाणस्त्रेधोरुगायः । तदस्य प्रियमभि-पाथो अश्याम् । नरो यत्र देवयवो मदन्ति । उरुक्रमस्य स हि बन्धुरित्था । विष्णोः पदे परमे मध्व उत्सः । प्रतद्विष्णुस्तवते वीर्याय । मृगो न भीमः कुचरो गिरिष्ठाः । यस्योरुषु त्रिषु विक्रमणेषु । अधिक्षियन्ति भुवनानि विश्वा । परो मात्रया तनुवा वृधान । न ते महित्वमन्वश्नुवन्ति । उभे ते विद्म रजसी पृथिव्या विष्णो देवत्वम् । परमस्य विथसे । विचक्रमे पृथिवीमेष एताम् । क्षेत्राय विष्णु-

र्मनुषे दशस्यन् । ध्रुवासो अस्य कीरयो जनासः । उरुक्षितिꣳसुजनिमाचकार । त्रिर्देवः पृथिवीमेष एताम् । विचक्रमे शतर्चसं महित्वा । प्रविष्णुरस्तु तवसस्तवीयान् । त्वेषꣳह्यस्य स्थविरस्य नाम ॥

इति विष्णुसूक्तम् ।

॥ श्रीसूक्तम् ॥

हिरण्यवर्णां हरिणीं सुवर्णरजतस्रजाम् ।
चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ॥ (2)
तां म आवह जातवेदो लक्ष्मीमनपगामिनीम् । (3)
यस्यां हिरण्यं विन्देयं गामश्वं पुरुषानहम् ॥ (4)
अश्वपूर्वां रथमध्यां हस्तिनादप्रबोधिनीम् । श्रियं
देवीमुपह्वये श्रीर्मा देवीर्जुषताम् । कां सोस्मितां
हिरण्यप्राकारामार्द्रां ज्वलन्तीं तृप्तां तर्पयन्तीम् । (7)
पद्मे स्थितां पद्मवर्णां तामिहोपह्वये श्रियम् ।
चन्द्रां प्रभासां यशसा ज्वलन्तीं श्रियं लोके

(9) देवजुष्टामुदाराम् । तां पद्मिनीमीं शरणमहं
(10) प्रपद्येऽलक्ष्मीर्मे नश्यतां त्वां वृणे ॥ आदित्यवर्णे
(11) तपसोऽधिजातो वनस्पतिस्तव वृक्षोऽथ बिल्वः ।
तस्य फलानि तपसा नुदन्तु मायान्तरा याश्च
(12) बाह्या अलक्ष्मीः । उपैतु मां देवसखः कीर्तिश्च
(13) मणिना सह । प्रादुर्भूतोऽस्मि राष्ट्रेऽस्मिन्कीर्ति-
(14) मृद्धिं ददातु मे ॥ क्षुत्पिपासामलां ज्येष्ठाम-
(15) लक्ष्मीं नाशयाम्यहम् । अभूतिमसमृद्धिं च
16 सर्वां निर्णुद मे गृहात् । गन्धद्वारां दुराधर्षां
17 नित्यपुष्टां करीषिणीम् । ईश्वरीं सर्वभूतानां
18 तामिहोपह्वये श्रियम् । मनसः काममाकूतिं
19 वाचः सत्यमशीमहि । पशूनां रूपमन्नस्य मयि
20 श्रीः श्रयतां यशः ॥ कर्दमेन प्रजाभूता मयि
21 संभव कर्दम । श्रियं वासय मे कुले मातरं
22 पद्ममालिनीम् ॥ आपः सृजन्तु स्निग्धानि

चिक्लीत वस मे गृहे । निच देवीं मातरं २३
श्रियं वासय मे कुले । आर्द्रां पुष्करिणीं पुष्टिं २४
सुवर्णां हेममालिनीम् । सूर्यां हिरण्मयीं लक्ष्मीं २५
जातवेदो म आवह । आर्द्रां यः करिणीं यष्टिं २६
पिङ्गलां पद्ममालिनीम् । चन्द्रां हिरण्मयीं २७
लक्ष्मीं जातवेदो म आवह ॥ तां म आवह २८
जातवेदो लक्ष्मीमनपगामिनीम् । यस्यां हिरण्यं २९
प्रभूतं गावो दास्योऽश्वान्विन्देयं पुरुषानहम् । ३०
यः शुचिः प्रयतो भूत्वा जुहुयादाज्यमन्वहम् ।
सूक्तं पञ्चदशर्चं च श्रीकामः सततं जपेत् ।
पद्मानने पद्म ऊरू पद्माक्षी पद्मसंभवे ।
तन्मे भजसि पद्माक्षी येन सौख्यं लभाम्यहम् । अश्वदायी गोदायी धनदायी महाधने । धनं मे जुषतां देवि सर्वकामांश्च देहि मे ॥ पद्मानने पद्मविपद्मपत्रे पद्मप्रिये

पद्मदलायताक्षि । विश्वप्रिये विश्वमनोऽनुकूले त्वत्पादपद्मं मयि संनिधत्स्व ॥ पुत्रपौत्रधनं धान्यं हस्त्यश्वादिगवे रथम् । प्रजानां भवसी माता आयुष्मन्तं करोतु मे । धनमग्निर्धनं वायुर्धनं सूर्यो धनं वसुः । धनमिन्द्रो बृहस्पतिर्वरुणं धनमस्तु ते ॥ वैनतेय सोमं पिब सोमं पिबतु वृत्रहा । सोमं धनस्य सोमिनो मह्यं ददातु सोमिनः । न क्रोधो न च मात्सर्यं न लोभो नाशुभा मतिः । भवन्ति कृतपुण्यानां भक्तानां श्रीसूक्तं जपेत् ॥ सरसिज निलये सरोजहस्ते धवलतरांशुकगन्धमाल्यशोभे । भगवति हरिवल्लभे मनोज्ञे त्रिभुवनभूतिकरि प्रसीद मह्यम् ॥ विष्णुपत्नीं क्षमां देवीं माधवीं माधवप्रियाम् । लक्ष्मीं प्रियसखीं देवीं नमाम्यच्युतवल्लभाम् ॥ महालक्ष्मी च विद्महे विष्णुपत्नी च

महादेव्यै च विद्महे विष्णुपत्न्यै च

धीमहि । तन्नो लक्ष्मीः प्रचोदयात् ॥ श्रीवर्चस्व मायुष्यमारोग्यमाविधाच्छोभमानं महीयते । धान्यं धनं पशुं बहुपुत्रलाभं शतसंवत्सरं दीर्घमायुः ॥

पद्मप्रिये पद्मिनि पद्महस्ते पद्मालये पद्मदलायताक्षि । विश्वप्रिये विष्णुमनोऽनुकूले त्वत्पादपद्मं मयि संनिधत्स्व ॥

श्रियै जात श्रिय आनिर्याय श्रियं वयो जनितृभ्यो दधातु । श्रियं वसाना अमृतत्वमायन् भजन्ति सद्यः सविता विदध्यून् ॥ श्रिय एवैनं तच्छ्रियामादधाति । सन्ततमृचा वषट्कृत्यं सन्धत्तं संधीयते प्रजया पशुभिः । य एवं वेद । ओं महादेव्यै च विद्महे विष्णुपत्न्यै च धीमहि । तन्नो लक्ष्मीः प्रचोदयात् ॥

इति श्रीसूक्तम् ।

॥ भूसूक्तम् ॥

भूमिर्भूम्नाद्यौर्वरिणाऽन्तरिक्षं महित्वा । उपस्थेते देव्यदितेऽग्निमन्नादमन्नाद्यायादधे । आऽयङ्गौः पृश्निरक्रमीदसनन्मातरं पुनः । पितरं च प्रयन्त्सुवः । त्रिःशद्धाम विराजति वाक्पतङ्गाय शिश्रिये । प्रत्यस्य वह द्युभिः । अस्य प्राणादपानत्यन्तश्चरति रोचना । व्यख्यन् महिषः सुवः । यत्त्वा क्रुद्धः परोवपमन्युना यदवर्त्या । सुकल्पमग्ने तत्तव पुनस्त्वोद्दीपया मसि । यत्ते मन्युपरोप्तस्य पृथिवीमनुदध्वसे । आदित्या विश्वे तद्देवा वसवश्च समाभरन् । मनो ज्योतिर्जुषतामाज्यं विच्छिन्नं यज्ञं समिमं

द॑धातु । बृह॒स्पति॑स्तनुतामि॒मं नो॒ विश्वे॑ दे॒वा इ॒ह मा॑दयन्ताम् ॥

मेदिनी देवी वसुंधरा स्याद्वसुधा देवी वासवी । ब्रह्मवर्चसः पितॄणां श्रोत्रं चक्षुर्मनः । देवी हिरण्यगर्भिणी देवी प्रसोदरी । रसने सत्यायने सीद ॥ समुद्रवती सावित्रीहनो देवी मह्यकी । महाधरणी महोऽर्यलिस्य ॥ शृङ्गे शृङ्गे यज्ञे यज्ञे विभीषणी । इन्द्रपत्नी व्याजनी सुरसित इह ॥ वायुपरी जलशयनी स्वयंधाग सत्यन्योपरि मेदिनी । सोपरिधत्तङ्गाय ॥ विष्णुपत्नीं महीं देवीं माधवीं माधवप्रियाम् । लक्ष्मीप्रियसखीं देवीं नमाम्यच्युतवल्लभाम् ॥ धनुर्धरायै विद्महे सर्वसिद्ध्यै च धीमहि । तन्नो धरा प्रचोदयात् ॥ इक्षुशालियवसस्यफलाढ्यां पारिजाततरुशोभितमूले । स्वर्णरत्नमणिमण्डपमध्ये चिन्तयेत् सकललोकधरित्रीम् ॥ श्यामां विचित्रां नवरत्नभूषितां चतुर्भुजां तुङ्गपयोधरान्विताम् । इन्दीवराक्षीं नवशालिमञ्जरीं शुकं दधानां वसुधां भजामहे ॥ सकतुमिव तितउना पुनन्तो यत्र धीरा मनसा वाचमक्रत । अत्रासखायस्सख्यानि जानते भद्रैषां लक्ष्मीर्निहिताऽधिवाचि ॥

ओं शान्तिः शान्तिः शान्तिः ॥

इति भूसूक्तम् ।

॥ नीळासूक्तम् ॥

गृणाहि । घृतवती सवितराधिपत्यैः पयस्वतीरन्तिराशानो अस्तु । ध्रुवा दिशां विष्णुपत्न्यघोराऽस्येशानासहसोया मनोतॉ । बृहस्पतिर्मातरिश्वोत वायुस्सन्धुवानावातां अभि नॉ गृणन्तु । विष्टम्भो दिवोधरुणः पृथिव्या अस्येशाना जगतो विष्णुपत्नी ॥

इति नीळासूक्तम् ॥

॥ दुर्गासूक्तम् ॥

जातवेदसे सुनवाम सोममरातीयतो निद-
हाति वेदः । स नः पर्षदति दुर्गाणि विश्वा
नावेव सिन्धुं दुरितात्यग्निः ॥ तामग्निवर्णां
तपसा ज्वलन्तीं वैरोचनीं कर्मफलेषु जुष्टाम् ।
दुर्गां देवीꣳशरणमहं प्रपद्ये सुतरसितरसे नमः ॥
अग्ने त्वं पारया नव्यो अस्मान्स्वस्तिभिरति
दुर्गाणि विश्वा । पूश्च पृथ्वी बहुला न उर्वी
भवा तोकाय तनयाय शंयोः । विश्वानि नो
दुर्गहा जातवेदः सिन्धुन्न नावा दुरितातिपर्षि ।

अग्ने अविवन्मनसा गृणानोऽस्माकं बोध्यविता तनूनाम् ॥ पृतनाजितꣳ सहमानमुग्रमग्निꣳ हुवेम परमात्सधस्थात् । स नः पर्षदति दुर्गाणि विश्वा क्षामद्देवो अति दुरितात्यग्निः ॥ प्रतोषिं कमीड्यो अध्वरेषु सनाच्च होता नव्यश्च सत्सि । स्वाञ्चाग्ने तनुवं पिप्रियस्वास्मभ्यं च सौभगमायजस्व ॥ गोभिर्जुष्टमयुजो निषिक्तं तवेन्द्र विष्णोरनुसंचरेम । नाकस्य पृष्ठमभिसंवसानो वैष्णवीं लोक इह मादयन्ताम् ॥

इति दुर्गासूक्तम् ॥

कात्यायनय विद्महे कन्यकुमारी धीमहि
तन्नो दुर्गा प्रचोदयात्

॥ मेधासूक्तम् ॥

मेधा देवी जुषमाणा न आगाद्विश्वाची भद्रा सुमनस्यमाना। त्वया जुष्टा जुषमाणा (नुदमाना) दुरुक्तान् बृहद्वदेम विदथे (थे) सुवीराः॥ त्वया जुष्टं ऋषिर्भवति देवि त्वया ब्रह्मागतश्रीरुत त्वया। त्वया जुष्टश्चित्रं विन्दते वसु सा नो जुषस्व द्रविणेन मेधे॥ मेधां म इन्द्रो ददातु मेधां देवी सरस्वती। मेधां मे अश्विनावुभावाधत्तां पुष्करस्रजा॥ अप्सरासु च या मेधा गन्धर्वेषु च यन्मनः। दैवी मेधा मनुष्यजा सा मां मेधा सुरभिर्जुषताम्॥ आमां मेधासुरभिर्विश्वरूपा हिरण्यवर्णा जगती जगम्या। ऊर्जस्वती पयसा पिन्वमाना सा मां मेधा सुप्रतीका जुषताम्॥

इति मेधासूक्तम्॥

S. 6.

॥ शान्तिपञ्चकम् ॥

शं नो मित्रः शं वरुणः । शं नो भवत्वर्यमा । शं न इन्द्रो बृहस्पतिः । शं नो विष्णुरुरुक्रमः । नमो ब्रह्मणे । नमस्ते वायो । त्वमेव प्रत्यक्षं ब्रह्मासि । त्वमेव प्रत्यक्षं ब्रह्म वदिष्यामि । ऋतं वदिष्यामि । सत्यं वदिष्यामि । तन्मामवतु । तद्वक्तारमवतु । अवतु माम् । अवतु वक्तारम् ॥

ओं शान्तिः शान्तिः शान्तिः ॥

शं नो मित्रः शं वरुणः । शं नो भवत्वर्यमा । शं न इन्द्रो बृहस्पतिः । शं नो विष्णुरुरुक्रमः । नमो ब्रह्मणे । नमस्ते वायो । त्वमेव प्रत्यक्षं ब्रह्मासि । त्वामेव प्रत्यक्षं ब्रह्मावादिषम् । ऋतमवादिषम् । सत्यमवादिषम् ।

तन्मामावीत् । तद्वक्तारमावीत् । आवीन्माम् । आवीद्वक्तारम् ॥

ओं शान्तिः शान्तिः शान्तिः ॥

सह नाववतु । सह नौ भुनक्तु । सह वीर्यं करवावहै । तेजस्वि नावधीतमस्तु मा विद्विषावहै ॥

ओं शान्तिः शान्तिः शान्तिः ॥

नमो वाचे या चोदिता या चानुदिता तस्यै वाचे नमो नमो वाचे नमो वाचस्पतये नम ऋषिभ्यो मन्त्रकृद्भ्यो मन्त्रपतिभ्यो मा मामृषयो मन्त्रकृतो मन्त्रपतयः परादुर्मा-ऽहमृषीन्मन्त्रकृतो मन्त्रपतीन्परादां वैश्वदेवीं वाचमुद्यासꣳशिवामदस्ताञ्जुष्टां देवेभ्यः शर्म मे द्यौः शर्म पृथिवी शर्म विश्वमिदं जगत् । शर्म चन्द्रश्च सूर्यश्च शर्म ब्रह्मप्रजापती । भूतं

वदिष्ये भुवनं वदिष्ये तेजो वदिष्ये यशो वदिष्ये तपो वदिष्ये ब्रह्म वदिष्ये सत्यं वदिष्ये तन्मा अवतु तद्वक्तारमवतु अवतु मामवतु वक्तारम्

ॐ शान्तिः शान्तिः शान्तिः ॥

तच्छंयोरावृणीमहे । गातुं यज्ञाय । गातुं यज्ञपतये । दैवी स्वस्तिरस्तु नः । स्वस्ति-मानुषेभ्यः । ऊर्ध्वं जिगातु भेषजम् । शं नो अस्तु द्विपदे । शं चतुष्पदे ॥

ॐ शान्तिः शान्तिः शान्तिः ॥

इति शान्तिपञ्चकम् ॥